
हर हर शंकर ॐ जय जय शंकर

श्री-वेदव्यासाय नमः

# श्रीमद्-आद्य-शंकर-भगवत्पाद-परंपरागत-मूलाम्नाय-सर्वज्ञ-पीठम्
# श्री-कांची-कामकोटि-पीठम्
# जगद्गुरु-श्री-शंकराचार्य-स्वामि-श्रीमठ-संस्थानम्

## पंचांग-पूजा

शांकर-संवत्सरः २५३५

५१२८ पराभव-चैत्र-शुक्ल-प्रथमा - 19.03.2026 - चांद्रमान-संवत्सरारंभः

५१२८ पराभवः-मेषः-१ - 14.04.2026 - सौरमान-संवत्सरारंभः

Prepare the Nimba Kusuma Bhakshanam and start the puja.
In water soaked with Tamarind, grind Neem flowers, filter it and add jaggery. This is called Nimba Kusuma Bhakshanam.

## पंचांग-पूजा

(आचम्य)

[विघ्नेश्वरपूजां कृत्वा।]

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशांतये॥

प्राणान् आयम्य।

(अप उपस्पृश्य, पुष्पाक्षतान् गृहीत्वा)

वेद-धर्म-शास्त्र-परिपालन-सभा
9884655618 8072613857 vdspsabha@gmail.com vdspsabha.org

ममोपात्तसमस्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं शुभे शोभने मुहूर्ते अद्य ब्रह्मणः द्वितीयपरार्धे श्वेतवराहकल्पे वैवस्वतमन्वंतरे अष्टाविंशतितमे कलियुगे प्रथमे पादे जंबूद्वीपे भारतवर्षे भरतखंडे मेरोः दक्षिणे पार्श्वे अस्मिन् वर्तमाने व्यावहारिकाणां प्रभवादि-षष्टिसंवत्सराणां मध्ये **पराभव**-नाम-संवत्सरे **उत्तरायणे वसंत**-ऋतौ

## 2026-03-19 **चांद्रमान-संवत्सरारंभः**

**चैत्र**-मासे **शुक्ल**-पक्षे **प्रथमायां** शुभतिथौ **गुरु**वासरयुक्तायाम् **उत्तरप्रोष्ठपदा**-नक्षत्र-युक्तायां **शुक्ल**-योगयुक्तायां **किंस्तुघ्न**-करणयुक्तायाम् एवं-गुण-विशेषण-विशिष्टायाम् अस्यां **प्रथमायां**

## 2026-04-14 **सौरमान-संवत्सरारंभः**

**मेष-चैत्र**-मासे **कृष्ण**-पक्षे **द्वादश्यां** शुभतिथौ **भौम**वासरयुक्तायां **शतभिषक्**-नक्षत्र (१६:०५)युक्तायां **शुक्ल**-योग (१५:३७; **ब्राह्म**-योग)युक्तायां **कौलव**-करण (१२:४६; **तैतिल**-करण)युक्तायाम् एवं-गुण-विशेषण-विशिष्टायाम् अस्यां **द्वादश्यां**

शुभतिथौ अस्माकं सहकुटुंबानां क्षेमस्थैर्य-धैर्य-वीर्य-विजय-आयुर्-आरोग्य-ऐश्वर्याभिवृद्ध्यर्थं धर्मार्थकाममोक्ष-चतुर्विधफलपुरुषार्थसिद्ध्यर्थं सत्संतानाभिवृद्ध्यर्थम् इष्टकाम्यार्थसिद्ध्यर्थम्
महागणपत्यादि-त्रयस्त्रिंशत्-कोटि-देवता-प्रीत्यर्थं संवत्सर-अयन-ऋतु-मास-पक्ष-तिथि-वार-
नक्षत्र-योग-करण-देवता-प्रीत्यर्थम् आदित्यादि-नवग्रह-देवता-प्रीत्यर्थं च यावच्छक्ति-ध्यान-आवाहनादि-षोडशोपचारपूजां करिष्ये। तदंगं कलशपूजां च करिष्ये।
[कलशपूजां कृत्वा।]

पराभवाह्वयं वंदे नर्यापसम् उदर्चिषम्।
उत्तुंग-तुरगारूढं परशूज्वल-पाणिकम्॥

अस्मिन् पंचांग-पुस्तके पराभव-संवत्सर-देवतां नर्यापसं ध्यायामि। नर्यापसम् आवाहयामि।
उत्तरायण-देवतां ध्यायामि। उत्तरायण-देवताम् आवाहयामि।
दक्षिणायन-देवतां ध्यायामि। दक्षिणायन-देवताम् आवाहयामि।

वसंतादि-ऋतु-देवताः ध्यायामि। वसंतादि-ऋतु-देवताः आवाहयामि।
मेषादि-मास-देवताः ध्यायामि। मेषादि-मास-देवताः आवाहयामि।
शुक्ल-पक्ष-देवताम् इंदुं ध्यायामि। शुक्ल-पक्ष-देवताम् इंदुम् आवाहयामि।
कृष्ण-पक्ष-देवतां सूर्यं ध्यायामि। कृष्ण-पक्ष-देवतां सूर्यम् आवाहयामि।
तिथि-देवताः ध्यायामि। तिथि-देवताः आवाहयामि।
वार-देवताः ध्यायामि। वार-देवताः आवाहयामि।
कृत्तिकादि-अष्टाविंशति-नक्षत्र-देवताः ध्यायामि। कृत्तिकादि-अष्टाविंशति-नक्षत्र-देवताः आवाहयामि।
विष्कंभादि-योग-देवताः ध्यायामि। विष्कंभादि-योग-देवताः आवाहयामि।
बवादि-करण-देवताः ध्यायामि। बवादि-करण-देवताः आवाहयामि।

आदित्याय च सोमाय मंगलाय बुधाय च।
गुरु-शुक्र-शनिभ्यश्च राहवे केतवे नमः॥

आदित्यादि-नवग्रह-देवताः ध्यायामि। आदित्यादि-नवग्रह-देवताः आवाहयामि।
नर्यापसादि-समस्त-देवताभ्यो नमः, आसनं समर्पयामि।
नर्यापसादि-समस्त-देवताभ्यो नमः, पाद्यं समर्पयामि।
नर्यापसादि-समस्त-देवताभ्यो नमः, अर्घ्यं समर्पयामि।
नर्यापसादि-समस्त-देवताभ्यो नमः, आचमनीयं समर्पयामि।
नर्यापसादि-समस्त-देवताभ्यो नमः, शुद्धोदकस्नानं समर्पयामि।
नर्यापसादि-समस्त-देवताभ्यो नमः, स्नानानंतरम् आचमनीयं समर्पयामि।
नर्यापसादि-समस्त-देवताभ्यो नमः, वस्त्रार्थम् अक्षतान् समर्पयामि।
नर्यापसादि-समस्त-देवताभ्यो नमः, यज्ञोपवीताभरणार्थे अक्षतान् समर्पयामि।
नर्यापसादि-समस्त-देवताभ्यो नमः, दिव्यपरिमलगंधान् धारयामि।
गंधस्योपरि हरिद्राकुंकुमं समर्पयामि।
नर्यापसादि-समस्त-देवताभ्यो नमः, अक्षतान् समर्पयामि। पुष्पैः पूजयामि।

1. पराभव-संवत्सर-देवतायै नर्यापसे नमः
2. उत्तरायण-देवतायै नमः
3. दक्षिणायन-देवतायै नमः
4. वसंतादि-ऋतु-देवताभ्यो नमः
5. मेषादि-मास-देवताभ्यो नमः
6. शुक्ल-पक्ष-देवतायै इंदवे नमः

7. कृष्ण-पक्ष-देवतायै सूर्याय नमः
8. तिथि-देवताभ्यो नमः
9. वार-देवताभ्यो नमः
10. कृत्तिकादि-अष्टाविंशति-नक्षत्र-देवताभ्यो नमः
11. विष्कंभादि-योग-देवताभ्यो नमः
12. बवादि-करण-देवताभ्यो नमः
13. आदित्याय नमः
14. सोमाय नमः
15. मंगलाय नमः
16. बुधाय नमः
17. गुरवे नमः
18. शुक्राय नमः
19. शनैश्चराय नमः
20. राहवे नमः
21. केतवे नमः

नर्यापसादि-समस्त-देवताभ्यो नमः, नानाविध-परिमल-पत्र-पुष्पाणि समर्पयामि।
नर्यापसादि-समस्त-देवताभ्यो नमः, धूपमाघ्रापयामि।
नर्यापसादि-समस्त-देवताभ्यो नमः, दीपं दर्शयामि।
नैवेद्यम्। नर्यापसादि-समस्त-देवताभ्यो नमः, निंबकुसुमभक्षणं कदलीफलं च निवेदयामि। आचमनीयं समर्पयामि।
नर्यापसादि-समस्त-देवताभ्यो नमः, कर्पूरतांबूलं समर्पयामि। नर्यापसादि-समस्त-देवताभ्यो नमः, कर्पूरनीराजनं दर्शयामि।
नर्यापसादि-समस्त-देवताभ्यो नमः, समस्तोपचारान् समर्पयामि।

नर्यापसादि-समस्त-देवताभ्यो नमः, प्रदक्षिणनमस्कारान् समर्पयामि।

प्रार्थनाः समर्पयामि।

कायेन वाचा मनसेंद्रियैर्वा
बुद्ध्याऽऽत्मना वा प्रकृतेः स्वभावात्।
करोमि यद्यत् सकलं परस्मै
नारायणायेति समर्पयामि॥

अनेन पूजनेन अग्न्यादयः प्रीयंताम्।

ॐ तत्सद्ब्रह्मार्पणमस्तु।

# लघु-पंचांग-पठन-पद्धतिः

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम्॥

तिथेश्च श्रियमाप्नोति वारादायुष्यवर्धनम्।
नक्षत्राद्धरते पापं योगाद्रोगनिवारणम्॥

करणात् कार्यसिद्धिः स्यात् पंचांगफलमुत्तमम्।
एतेषां श्रवणान्नित्यं गंगास्नानफलं भवेत्॥

During the Panchanga reading, the following should be read: The year's Navanayaka phalam, Makara Sankranti phalam, Kandhaaya phalam, Rashi phalam, Grahanas, and details on the Udaya and Astamana of the Grahas. Then, the Chithirai 1st date Panchanga should be read twice.

These details will be given in every Panchanga in different places. One should note them down the previous day and read them after the Panchanga Puja, while others listen.

मंगलं कोसलेंद्राय महनीयगुणात्मने।
चक्रवर्तितनूजाय सार्वभौमाय मंगलम्॥

❀❀❀

# निंबकुसुमभक्षणम्

நிம்பகுஸுமபக்ஷணம் சாப்பிடுவதற்கான ஶ்லோகம்

शतायुर्वज्रदेहाय सर्वसंपत्कराय च।
सर्वानिष्टविनाशाय निंबकंदलभक्षणम्॥

**After this, Sankalpam should be done and Nitya Puja should be performed.**

❀

# नवग्रहस्तोत्रम्

जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम्।
तमोरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम्॥ १ ॥

(सूर्यः)

दधिशंखतुषाराभं क्षीरोदार्णवसंभवम्।
नमामि शशिनं सोमं शंभोर्मुकुटभूषणम्॥ २ ॥

(चंद्रः)

धरणीगर्भसंभूतं विद्युत्कांतिसमप्रभम्।
कुमारं शक्तिहस्तं तं मंगलं प्रणमाम्यहम्॥ ३ ॥

(अंगारकः)

प्रियंगुकलिकाश्यामं रूपेणाप्रतिमं बुधम्।
सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम्॥ ४ ॥

(बुधः)

देवानां च ऋषीणां च गुरुं कांचनसन्निभम्।
बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम्॥ ५ ॥

(बृहस्पतिः)

हिमकुंदमृणालाभं दैत्यानां परमं गुरुम्।
सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम्॥ ६ ॥

(शुक्रः)

नीलांजनसमाभासं रविपुत्रं यमाग्रजम्।
छायामार्तंडसंभूतं तं नमामि शनैश्चरम्॥ ७ ॥

(शनैश्चरः)

अर्धकायं महावीर्यं चंद्रादित्यविमर्दनम्।
सिंहिकागर्भसंभूतं तं राहुं प्रणमाम्यहम्॥ ८ ॥

(राहुः)

पलाशपुष्पसंकाशं तारकाग्रहमस्तकम्।
रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम्॥ ९॥

(केतुः)

इति व्यासमुखोद्गीतं यः पठेत् सुसमाहितः।
दिवा वा यदि वा रात्रौ विघ्नशांतिर्भविष्यति॥ १०॥

नरनारीनृपाणां च भवेद्दुःस्वप्ननाशनम्।
ऐश्वर्यमतुलं तेषामारोग्यं पुष्टिवर्धनम्॥ ११॥

ग्रहनक्षत्रजाः पीडास्तस्कराग्निसमुद्भवाः।
ताः सर्वाः प्रशमं यांति व्यासो ब्रूते न संशयः॥ १२॥

॥इति श्रीव्यासविरचितं नवग्रहस्तोत्रं संपूर्णम्॥


9884655618 8072613857 vdspsabha@gmail.com vdspsabha.org